## ३७. चित्ररचना

यत्-तत्, द्वितीया-तृतीया

शिक्षकः - भोः अहं कृष्णफलके बहूनि चित्राणि लिखामि । भवन्तः तत् दृष्ट्वा यत् इच्छन्ति तत् लिखन्तु ।

चन्दनः - श्रीमन् ! लेखन्या लिखामि उत अङ्कन्या ? केन लिखामः ?

शिक्षकः - अङ्कन्या अपि लेखितुं शक्नुवन्ति । लेखन्या, वर्णलेखन्या, अन्येन केनचित् वा लेखितुं शक्नुवन्ति।

वसुमती - अहं अङ्कन्या लिखामि । पवित्रा लेखन्या लिखति श्रीमन् ।

पवित्रा - अहम् अङ्कनीं न आनीतवती । अतः लेखन्या विमानं लिखामि ।

अञ्जली - श्रीमन् अहं कूर्चेण शृगालं लिखामि किम् ?

शिक्षकः - लिखतु । यदि शक्नोति तर्हि वर्णमपि योजयतु ।

जनार्दनः - अङ्कन्या घटीं लिखामि । राघवः किमपि न लिखति । तृष्णीम् उपविष्टवान् अस्ति सः ।

शिक्षकः - किमर्थं राघव ? किम् अभवत् भवतः ?

राघवः - अहम् अङ्कनीं लेखनीं वा न आनीतवान् । कथं लिखानि ?

पुनीतः - मम समीपे द्वे अङ्कन्यौ स्तः । स्वीकरोतु एकाम् अङ्कनीम् ।

राघवः - धन्यवादः । श्रीमन् ! अङ्कन्या फलं लिखामि ।

शिक्षकः - विंशति निमेषेषु भवन्तः चित्रं रचयित्वा दर्शयन्तु । परस्परं वार्तालापं मा कुर्वन्तु ।